ओं सत्गुरुभ्यो नमः

## केतु स्तोत्र महामन्त्रं

-----------------------------------

अस्य श्री केतुस्तोत्र महामन्त्रस्य
वाम देव ऋषिः अनुष्टुप् छन्दः केतुर्देवता
केतुप्रसाद सिद्ध्यर्त्थे जपे विनियोगः

**गौतम उवाचः–**

मुनीन्द्र सुत तत्वज्ञ
सर्व्व शास्त्रविशारदः
सर्व्वरोगहरं ब्रूहि
केतोः स्तोत्रमनुत्तमं (1)

**सूत उवाचः–**

शृणुगौतम वक्ष्यामि
स्तोत्रमेतदनुत्तमं
गुह्यात् गुह्यतमं केतोः
ब्रह्मणा कीर्त्तितं पुरा (2)

आद्यः कराळवदनो
द्वितीयो रक्तलोचनः
तृतीय पिंगळाक्षश्च
चतुर्त्थो ज्ञानदायकः (3)

पञ्चम कपिलाक्षश्च
षष्ठः कालाग्निसन्निभः
सप्तमो हिमगर्भश्च
धूम्रवर्ण्णो ऽष्टमस्तथा (4)

नवमः कृत्तकण्ठश्च

दशमो नरपीडक
एकादशस्तु श्रीकण्ठ
द्वादशस्तु गदायुधः (5)

द्वादशैते महाक्रूराः
सर्व्वोपद्रवकारकाः
पर्व्वकाले पीडयन्ति
दिवाकरनिशाकरौ (6)

नामद्वादशकं स्तोत्रं
केतोरेतन् महात्मनः
पठन्तिये ऽ न्वहं भक्त्या
तेभ्यः केतुः प्रसीदति (7)

कुळत्थधान्ये विलिखेद्
षट्कोणं मण्डलं शुभं
पत्ममष्टदळं तत्र
विलिखेच्च्य विधानतः (8)

नीलं घटं च संस्थाप्य
दिवाकर निशाकरौ
केतुं च तत्र निक्षिप्य
पूजयित्वा विधानतः (9)

स्तोत्रमेतत् पठित्वा च
ध्यायेत् केतुं वरप्रदं
ब्रह्मणं श्रोत्रियं शान्तं
पूजयित्वा कुटुंबिनं (10)

केतो कराळवक्त्रस्य
प्रतिमां वस्त्रसंयुतां
कुंभादिभिश्च संयुक्तां
चित्राधारे प्रदापयेत् (11)

दानेनानेन सुप्रीतः

केतुः स्यात्तस्यसौख्यदः
वत्सरं प्रयतोभूत्वा
पूजयित्वा विधानतः (12)

मूलमष्टोत्तरशतं
ये यजन्ति नरोत्तमाः
दोषं केतु प्रसादेन
न कदाचित् भयं भवेत् (13)

**श्री केतुस्तोत्रं सन्पूर्णं**